**This question paper contains 4 printed pages.**

| | | |
|---|---|---|
| **Roll No.** | **:** | |
| **Unique Paper Code** | **:** | **121302302** |
| **Title of the Paper** | **:** | **कादम्बरी एवं वासवदत्ता** |
| **Name of the Course** | **:** | **M.A., Sanskrit (LOCF), Examination, Jan 2024** |
| **Semester** | **:** | **III** |
| **Duration** | **:** | **3 Hours** |
| **Maximum Marks** | **:** | **70** |

**इस प्रश्नप्रत्र के मिलते ही ऊपर दिए गए निर्धारित स्थान पर अपना अनुक्रमाँक लिखिए।**

**Write your Roll No. on the top immediately on receipt of this question paper**

**टिप्पणी:** अन्यथा आवश्यक न होने पर इस प्रश्न-पत्र का उत्तर **संस्कृत** या **हिन्दी** या **अंग्रेजी** किसी एक भाषा में दीजिए, परन्तु सभी प्रश्नों का माध्यम एक ही होना चाहिए।

**Note:** Unless otherwise required in a question, answers should be written in **Sanskrit** or in **Hindi** or in **English** but the same medium should be used throughout the paper.

**1.** अधोलिखित गद्यांशों की सप्रसङ्ग व्याख्या कीजिए। **7x2=14**

Explain the following passage with the context:

i. स पुनरन्य एव देवो न्यक्कृतसर्वोर्वीपतिचरितः। तथाहि स पर्वतः कटकसञ्चारिणो गन्धर्वान् दर्शित- शृङ्गोन्नतिः सुखयन् न विरराम। स हि मालयो नावश्यायोच्छलितो नो मायाजन्मने हितश्च। स हि मानी गिरिस्थितो वृषध्वजः। असौ सदागतिरवधूताखिलकान्तारः पावकाग्रेसरी नभोगोत्सुकः सुमनोहरश्च। स रत्नाकरोऽनहिमयः कथमगाधः समर्यादो नोद्रोकोऽप्यस्य विस्मयाः सदा हिमकराश्रयोऽमृतमयः सपोतस्तस्याचलो नक्रोधो महानदीनः समुद्रः। स चन्द्र इव क्षणदानन्दकरः कुमुदवनबन्धुः सकलकलाकुलगृहं नतारातिबलः। मित्रोदयहेतुः काञ्चनशोभां बिभ्रदचलाधिकलक्ष्मीः सुमेरुरिव।

**अथवा/OR**

येन च चन्द्रेणेव सकलकलाकुलगृहेण, शर्वरीतिहारिणा, दलितकैरवेण, प्रसाधिताशेन विलोकिताः, जलधय इव समुल्लसितगोत्राः, सुदूरविवर्द्धितजीवनाः, प्रसन्नसत्त्वाः सन्तः, परामृद्धिमवापुः। यस्य च जनितानिरुद्धलीलस्य, रतिप्रियस्य, कुसुमशरासनस्य मकरकेतोरिव दर्शनेन वनिताजनस्य हृदयमुल्ललास। यस्मै चानुगतदक्षिणसदागतये नेत्रश्रुतिसुखदाय कोमलकोकिलरुताय विकासितपल्लवाय कृतकान्तारतरङ्गाय सुरभिसुमनोऽभिरामाय सर्वजनसुलभपद्माय विस्तृतकनकसम्पदे अतिक्रान्तदमनकाय वसन्तायेव उपवनलता

इवोत्कलिकासहस्रसङ्कुलः भ्रमरसङ्गताः प्रवालहारिण्यः विलसद्वयसस्तरुण्यः स्पृहयाञ्चक्रुः।

ii. रुद्र इव विरूपाक्षः विष्णुरिव चक्रधरः। शक्राश्व इवोच्चैश्रवाः नदेशजप्रशंसी च। शरस्येव विभिन्नस्यापि सतः स्नेहं दर्शयतः तक्राट इव हृदयं विलोडयति। यक्षबलिरिव आत्मघोषमुखरो मण्डलभ्रमणकश्च। मातङ्ग इव स्ववशालोलमुखोऽधरीकृतदानश्च वृषभ इव सुरभियानविकलः कामीव गोत्रस्खलनविधुरो वामाध्वानुरक्तश्च। जीर्णरोग इव कलेवरे वचसि मन्दिमानमावहति। वञ्चक इव रक्तः कटपले विभावरीरक्तश्च। परेत इव बन्धुतापदर्शनः । परशुरिव भद्रश्रियमपि खण्डयति। कुदाल इव दलितगोत्रः क्षमाभाजः प्राणिनश्च निकृन्तति ।

**अथवा/OR**

यश्चसमदकलहंससारसरसितोद्भ्रान्तभाकूटविकटकुञ्जकूर्चव्याधूतकमलषण्डगलितमकरन्दबिन्दुसन्दोह सुरभितसलिलया, सायन्तनसमयमज्जत्पुलिन्दराजसुन्दरीनिम्ननाभिमण्डलपीतप्रतिहतरयसलिलया, मदमुखरराजहंसकुलकोलाहलमुखरितकूलपुलिनया, तटनिकटस्थितमत्तमातङ्गगण्डस्थलविगलन्मदधाराबिन्दुप्रकरस्तबकितसलिलया, तीरप्ररूढकेतकीकाननपतितधूलीनिकुरम्बसंजातसितसैकतसुखोपविष्टतरुणसुरमिथुननिधुव-नलीलापरिमलसाक्षिकूलोपवनया, तटावटविघटिताम्भोजषण्डमण्डपावस्थितजलदेवतावगाह्यमानपयसा, रेवया प्रियतमयेव प्रसारिततरङ्गहस्तयोपगूढः।

**2.** अधोलिखित गद्यांशों की सप्रसङ्ग व्याख्या कीजिए। **7x2=14**

Explain the following proses with the context:

i. नाम्नैव यो निर्भिन्नारातिहृदयो विरचितनरसिंहरूपाडम्बरम् एकविक्रमाक्रान्तसकलभुवनतलो विक्रमत्रयायासितभुवनत्रयं जहासेव वासुदेवम्। अतिचिरकाललग्नमतिक्रान्तकुनृपतिसहस्रसम्पर्ककलङ्कमिव क्षालयन्ति यस्य विमले कृपाणधाराजले चिरमुवास राजलक्ष्मीः। यश्च मनसि धर्मेण कोपे यमेन प्रसादे धनदेन प्रतापे वह्निना भुजे भुवा दृशि श्रिया वाचि सरस्वत्या मुखे शशिना बले मरुता प्रज्ञायां सुरगुरुणा रूपे मनसिजेन तेजसि सवित्रा च वसतः सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति भगवतो नारायणस्य।

**अथवा/OR**

अस्ति मध्यदेशालङ्कारभूता मेखलेव भुवः पूर्वापरजलनिधिवेलावनलग्ना वनकरिकुलमदजलसेकसंवर्द्धितैरतिविकचधवलकुसुमनिकरमत्युच्चतया तारागणमिव शिखरदेशलग्नमुद्वहद्भिः पादपैरुपशोभिता मदकलकुररकुलदश्यमानमरिचपल्लवा करिकलभकरमृदिततमालकिसलयामोदिनी मधुमदोपरक्तकेरलीकपोलच्छविना सञ्चरद्वनदेवताचरणालक्तकरसरञ्जितेनेव संछादिता नखमुखलग्नेभकुम्भमुक्ताफललुब्धैः पल्लवचयेन शबरसेनापतिभिरभिहन्यमानकेशरिशता पवित्रा विन्ध्याटवी नाम।

ii. यत्र च पीतोद्गीर्णजलनिधिजलमिव मुनिना निखिलमाश्रमोपान्तवर्तिषु विभक्तं महाह्रदेषु। यत्र च दशरथसुतनिशितशरनिकरनिपातनिहतरजनीचरबलबहलरुधिरसिक्तमूलमद्यापि तद्रागिविद्धनिर्गतपलाशमिवाभाति नवकिसलयमरण्यम्। अधुनापि यत्र जलधरसमये गम्भीरमभिनवजलधरनिवहनिनादमाकर्ण्य भगवतो रामस्य त्रिभुवनविवरव्यापिनश्चापघोषस्य स्मरन्तो न गृह्णन्ति शष्पकवलमजनमश्रुजललुलितदृष्टयो वीक्ष्य शून्या दशदिशो जराजर्जरितविषाणकोटयो जानकीसंवर्द्धिता जीर्णमृगाः। यस्मिन्ननवरतमृगयानिहतशेषवनहरिणप्रोत्साहित इव कृतसीताविप्रलम्भः कनकमृगो राघवमतिदूरं जहार।

**अथवा/OR**

प्रशमेन तुषाररश्मेः निर्मलतयाऽम्बरतलस्य संविभागमिव कुर्वाणं वैनतेयमिव स्वप्रभावोपात्तद्विजाधिपत्यं कमलासनमिवाश्रमगुरुं जरच्चन्दनतरुमिव भुजङ्गनिर्मोक धवलजटाकुलं प्रशस्तवारणपतिमिव प्रलम्बकर्णबालं बृहस्पतिमिवाजन्मवर्द्धितकचं दिवसमिवोद्यदर्कबिम्बभास्वरमुखं शरत्कालमिव क्षीणवर्षं शान्तनुमिव प्रियसत्यव्रतम् अम्बिकाकरतलमिव रुद्राक्षवलयग्रहणनिपुणां शिशिरसमयसूर्यमिव कृतोत्तरासङ्गं वडवानलमिव सततपयोभक्ष्यं शून्यनगरमिव दीनाऽनाथविपन्नशरणं पशुपतिमिव भस्मपाण्डुरोमाश्लिष्टशरीरं भगवन्तं जाबालिमपश्यम्।

**3.** प्रत्येक भाग में से कम से कम एक का चयन करते हुए किन्हीं **तीन** पर टिप्पणी लिखिए: **5x3=15**
Write short notes on **three** in total, taking at least **one** from each part:

i. वासवदत्ताविषयक स्वप्नवर्णन, मकरन्दसंवाद, कुसुमपुरस्थित गङ्गावर्णन
ii. शाल्मलीवृक्षवर्णन, चाण्डालकन्यावर्णन, शबरसैन्यवर्णन

**4.** अधोलिखित पद्य की **संस्कृत** में व्याख्या कीजिए। **07**

Explain the following verse in Sanskrit language.

सा रसवत्ता विहता नवका विलसन्ति चरति नो कङ्कः।
सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये ॥

**अथवा/OR**

सुभाषितं हारि विशत्यधो गलान्न दुर्जनस्यार्करिपोरिवामृतम्।
तदेव धत्ते हृदयेन सज्जनो हरिर्महारत्नमिवातिनिर्मलम्॥

**5.** वासवदत्ता में प्रतिपादित आदर्श राजनीतिक व्यवस्था का वर्णन कीजिए। **10**

Describe the ideal political system depicted in Vāsavadattā.

**अथवा/OR**

सुबन्धु की अलङ्कारयोजना का विश्लेषण कीजिए।

Describe the अलङ्कारयोजना of Subandhu.

**6.** कादम्बरी कथामुख में प्रकृति-चित्रण' विषय पर निबन्ध लिखिए। **10**

Write an essay on 'Depiction of nature in Kādambarī-kathāmukha'.

**अथवा/OR**

कादम्बरी कथामुख के आधार पर 'बाणोच्छिष्टं जगत्सर्वम्' विषय पर एक समीक्षात्मक लेख लिखिए।

Write a critical note on 'बाणोच्छिष्टं जगत्सर्वम्' according to Kādambarī-kathāmukha.